
**पञ्चदशः पाठः**

# भगीरथः

**अस्माकं भारतदेशे बह्व्यः नद्यः सन्ति तासु परमपावनी मुक्तिप्रदायिनी गङ्गा नदी वर्तते। जनाः वदन्ति यत् – ''गङ्गे तव दर्शनान्मुक्तिः'' इति। एषा गङ्गा पूर्वं भूलोके नासीत्। सगरस्य वंशजेन भगीरथेन कठिनतपसा एषा भुवम् आनीता। एषा कथं किमर्थं च भूलोके आनीता इति पाठेऽस्मिन् प्रस्तूयते।**

सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेधयागं कृतवान्। यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

सगरस्य षष्टिसहस्रपुत्राः अश्वम् अन्वेष्टुं सर्वत्र गतवन्तः। अन्ते ते पातालं गतवन्तः। तत्र मुनेः पुरतः ते अश्वं दृष्टवन्तः। मुनिः एव चौरः इति चिन्तयित्वा ते तं निन्दितवन्तः। कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान्। ते भस्मरूपेण तत्र पाताललोके स्थितवन्तः। तेषां सद्गतिः न अभवत्। एतेषां मुक्तिः कथं भवेत्? पूर्वजानां मुक्तिः वंशजप्रयत्नैः एव सम्भाव्यते इति शास्त्रमतम्।



सगरस्य वंशे भगीरथस्य जननम् अभवत्। सः स्वपूर्वजान् स्वर्गं नेतुं निश्चितवान्। यदा गङ्गायाः जलं भस्म स्प्रक्ष्यति तदा एव सगरपुत्राणां पापस्य नाशः अपि भविष्यति इति भगीरथस्य निश्चयः।

तस्मिन् काले भूलोके गङ्गा न आसीत्। आकाशमार्गे तस्याः प्रवाहं सोढुं भूमिः शक्ता न आसीत्। तां प्रथमतः गृहीतुं परमेश्वरः एव शक्तः आसीत्। तस्मात् ईश्वरं ध्यात्वा भगीरथः तपः कृतवान्। सहस्रवर्षानन्तरम् एव ईश्वरः आकाशगङ्गां स्वजटासु ग्रहीतुम् अङ्गीकृतवान्। एवं सा नदी ईश्वरस्य जटासु प्रथमं पतितवती। आकाशगङ्गा तदा गर्विता आसीत्। ''कथम् एषः ईश्वरः मां धारयितुं शक्तः?'' इति चिन्तितवती सा। नद्याः गर्वं ज्ञात्वा शिवः तां जटासु एव निक्षिप्तवान्। अतः नद्याः एकः जलबिन्दुः अपि बहिः भूमौ न पतितः।

भगीरथः दुःखितः अभवत्। सः पुनः तपः कृतवान्। शिवः तस्य पुरतः प्रत्यक्षः अभवत्। ''हे ईश ! नदीं भूमौ विसृजतु'' इति भगीरथः प्रार्थितवान्। तां प्रार्थनाम् अङ्गीकृत्य शिवः नद्याः जलं भूमौ विसृष्टवान्। भगीरथः नदीं भूमितः पातालं नीतवान्। पाताले प्रवहन्ती गङ्गा सगरपुत्राणां भस्मानि स्पृष्टवती। सगरपुत्राः स्वर्गलोकं गतवन्तः।

इत्थं भगीरथस्य प्रयत्नाः अपूर्वाः। सः गङ्गां भूमौ आनीतवान्। अनेन कारणेन एव तस्याः नद्याः भागीरथी इति अन्यत् नाम अस्ति। प्रयत्नविषये उक्तञ्च -

***प्रारभ्यते न खलु विघ्नभयेन नीचैः,***
***प्रारभ्य विघ्नविहता विरमन्ति मध्याः।***
***विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,***
***प्रारभ्य चोत्तमजनाः न परित्यजन्ति ॥***

## शब्दार्थः

असूया - घृणा। दग्धवान् - जला दिया। जननम् - जन्म। स्प्रक्ष्यति - स्पर्श करेगा/करेगी। प्रवाहम् - बहाव को। सोढुम् - सहने के लिए। अङ्गीकारम् - स्वीकृति/सहमति को। आकाशगङ्गा - आकाश की गंगा नदी। गर्विता - घमण्ड युक्त। निक्षिप्तवान् - छिपा लिया। प्रत्यक्षः - प्रगट। विसृजतु- भेजो/विसर्जित करो। विसृष्टवान् - भेजा/विसर्जित किया।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) सूर्यवंशस्य राजा कः आसीत् ?

(ख) यागस्य विघ्नं कर्तुं कः मार्गं चिन्तितवान् ?

(ग) सगरपुत्राः कस्य पुरतः अश्वं दृष्टवन्तः ?

(घ) कस्य वंशे भगीरथस्य जननम् अभवत् ?

(ङ) आकाशगङ्गां शिवः कुत्र निक्षिप्तवान् ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) भगीरथः कान् स्वर्गं नेतुं निश्चितवान् ?

(ख) कं ध्यात्वा भगीरथः तपः कृतवान् ?

(ग) भगीरथः नदीं भूमितः कुत्र नीतवान् ?

(घ) कस्याः अपरं नाम भागीरथी ?

(ङ) के कार्यं प्रारभ्य न परित्यजन्ति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) देवेन्द्रः किमर्थं सगराय असूयति स्म ?

(ख) भगीरथः किं निश्चयं कृतवान् ?

(ग) नीचमध्यमोत्तमजनानां लक्षणं किम् ?

**4. उचितशब्देन रिक्तस्थानानि पूरयत –**

(क) सगरः .......................... कृतवान्। (गोमेधयागं/अश्वमेधयागं)

(ख) कार्यं प्रारभ्य ................. विरमन्ति। (मध्याः/नीचाः)

(ग) भगीरथः पुनः .............. कृतवान् । (जपः/तपः)

(घ) गङ्गा सगरपुत्राणां ........................ स्पृष्टवती। (शरीराणि/भस्मानि)

(ङ) भगीरथः ..................... भूमौ आनीतवान्। (गङ्गां/यमुनां)

**5. यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) सगरस्य | गर्विता |
| (ख) कपिलमुनिः | षष्टिसहस्रपुत्राः |
| (ग) आकाशगङ्गा | न प्रारभ्यते |
| (घ) भगीरथस्य प्रयत्नाः | कुपितः जातः |
| (ङ) नीचैः | अपूर्वाः |

**6. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षम् ''न'' इति लिखत –**

(क) सगरः अश्वमेधयागं न कृतवान्। ☐

(ख) कपिलमुनिः ध्याने आसीत्। ☐

(ग) सगरपुत्राः अश्वम् अन्वेष्टुं न गतवन्तः। ☐

(घ) सगरस्य पुत्राः भस्मीभूताः जाताः। ☐

(ङ) भगीरथः गङ्गां भूमौ न आनीतवान्। ☐

**7. उदाहरणानुसारं शब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा - सगरः | सगर | प्रथमा | एकवचनम् |
| (क) यागस्य | | | |
| (ख) ध्याने | | | |
| (ग) मुनेः | | | |
| (घ) अश्वम् | | | |
| (ङ) भूलोके | | | |
| (च) भूमौ | | | |
| (छ) जटासु | | | |

**8. उदाहरणानुसारं धातुं प्रत्ययं च पृथक् कुरुत -**

यथा - कृतवान् कृ + क्तवतु

(क) कर्तुम्

(ख) नेतुम्

(ग) चिन्तितवान्

(घ) पतित:

(ङ) ज्ञातवान्

**9. अधोलिखितशब्दानां समानार्थकशब्दान् लिखत -**

यथा - शक्त: - समर्थ:

(क) राजा

(ख) मुनि:

(ग) गङ्गा

(घ) भूमि:

(ङ) शिव:

**10. निम्नलिखित-अव्ययानि प्रयुज्य वाक्यनिर्माणं कुरुत -**

यथा - एकदा - नृप: एकदा यागं कृतवान्।

(क) तत्र

(ख) एव

(ग) यदा

(घ) पुरत:

(ङ) अपि

## योग्यताविस्तार: -

- गङ्गाया: विषये अन्या: कथा: अन्विष्य लिखत पठत च।
- एवम् अन्या: अपि शिक्षाप्रदा: कथा: पठत; तथा च निम्नलिखितौ श्लोकौ कण्ठस्थं कुरुत -
  - *"गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि।*
    *मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥"*
  - *मातर्गङ्गे तरलतरङ्गे सततं वारिधिवारिणि सङ्गे॥*
    *मम तव तीरे पिबतो नीरं 'हरि हरि' जपत: पततु शरीरम्॥*